जायकः-यिका, जापकः-पिका, जिगीषकः-षिका, जेजीयकः-यिकाः ;
इत्यादीनि सर्वाण्यपि रूपाणि अव्यवहितपूर्वलिखितजिधातुवत् (599) बोध्यानि ।
[1]जित्यः ।

(601) " जि भाषार्थः " (X-चुरादिः-1794. अक. सेट्. उभ.)

आस्वदीयः ।

जापकः-पिका, जिजापयिषकः-षिका, जापयिता-त्री, जिजापयिषिता-त्री ;
इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकचिधातुवत् (518) ज्ञेयानि ।

(602) " जिम अदने " (I-भ्वादिः-472. सक. सेट्. पर.)

'झमु' इत्यस्य पाठान्तरमिति केचित् ।

जेमकः-मिका, जेमकः-मिका, [2]जिजेमिषकः-जिजिमिषकः-षिका, [3]जेजिमकः-मिका ;
जेमिता-त्री, जेमयिता-त्री, जिजेमिषिता-जिजिमिषिता-त्री, जेजिमिता-त्री ;
जेमन्-न्ती, जेमयन्-न्ती, जिजेमिषन्-जिजिमिषन्-न्ती ; —
जेमिष्यन्-न्ती-ती, जेमयिष्यन्-न्ती-ती, जिजेमिषिष्यन्-जिजिमिषिष्यन्-न्ती-ती ; —
[4]व्यतिजेममानः, व्यतिजेमिष्यमाणः, — जेमयमानः, जेमयिष्यमाणः, जेजिम्यमानः, जेजिमिष्यमाणः ;
[5]प्रजीन्-प्रजीमौ-प्रजीमः ; — — —
जिमितम्-तः, जेमितः, जिजेमिषितः-जिजिमिषितः जेजिमितः-तवान् ;

---

1. 'विपूयविनीयजित्या मुञ्जकल्कहलिषु' (3-1-117) इत्यनेन हलौ कृष्टसमीकरणार्थे स्थूलकाष्ठे वाच्ये क्यप् भवति । जित्यो = हलिः । बलेन कृष्टव्य इत्यर्थः ।
2. 'रलो व्युपधाद्धलादेः संश्च' (1-2-26) इति सेटः सनः कित्त्वविकल्पनाद्रूपद्वयम् । एवं सन्नन्ते सर्वत्र, क्त्वाप्रत्ययेऽपि ज्ञेयम् ।
3. यङन्तात्, अभ्यासे 'गुणो यङ्लुकोः' (7-4-82) इति गुणः । एवं यङन्ते सर्वत्र ज्ञेयम् ।
4. 'कर्तरि कर्मव्यतीहारे' (1-3-14) इति शानच् ।
5. 'अनुनासिकस्य क्विझलोः क्ङिति' (6-4-15) इति दीर्घे, 'मो नो धातोः' (8-2-64) इति नत्वे च रूपम् ।